संस्कृतवार्ता:

दिनाङ्क :-22.02.2025

प्रात: - 06:55

अथ वार्ता:

प्रधानमन्त्री नरेन्द्र मोदी

प्रधानमन्त्री नरेन्द्र मोदी समुदीरितवान् यत् भाषाणां बाध्यता न कुत्रापि स्यात् इति अस्माकं समेषां सामूहिकमुत्तरदायित्वं स्यादिति। गतदिने नवदेहल्यां अष्टनवतितमे अखिल भारतीय मराठी- साहित्य- सम्मेलनस्य उद्घाटनावसरे श्री मोदी प्रकाशितवान् यत् महाष्ट्रस्य नैके सन्तगणा: मराठी-भाषायां भक्ति-आन्दोलनस्य माध्यमेन समाजाय नवचेतनां प्रकटितवन्त:। श्री मोदी प्रोक्तवान् यत् मराठी भाषायां प्रकाशितेन माठी-साहित्येन समाजस्य शोषित-वञ्चतवर्गेभ्य: समाजस्य मुक्तिद्वारमार्गा: प्रशस्ता:। प्रधानमन्त्री नरेन्द्र मोदी प्रोक्तवान् यत् भारत-सर्वकारेण सर्वा: भाषा: मुख्यधारारूपत्वेन दरदृष्टा:। श्री मोदी प्रोक्तवान् यत् भारतीय- भाषाणां मध्ये न कोपि विभेद: अपितु परस्परं सर्वा भाषा: निबद्धा:। त्रिदिवसीये सम्मेलने एतस्मिन् पुस्तक- प्रदर्शनी सांस्कृतिक-प्रदर्शनं, सम्वाद-सत्राणि च समायोजयिष्यन्ते।

विदेश मन्त्री

विदेश – मन्त्री डॉ. सुब्रह्मण्यम जयशंकर: सबलं प्रोक्तवान् यत् जी विंशति: इत्येतेस्य वैश्विक- समाह्वनानि समालक्ष्य स्वीय -नेतृत्व – सम्पूर्णता पूर्णरूपेण प्रतिबिम्बिता स्यात्। श्री जयशंकर: गतदिने दक्षिण- अफ्रीकायां जोहान्सबर्गनगरे जी विंशति:- इत्येतस्य उद्देश्यमालक्ष्य विदेश मन्त्रिणाम् उपवेशनसत्रे सवीय- विचारान् प्रकाशितवान्। डॉ. जयशंकर: एतदपि सबलं समुदीरितवान् यत् जी विंशति: - इत्यत्र सदैव सहयोग – अनिवार्यता मुख्यरूपेण सन्नद्धा स्यात्। एतत्पूर्वं श्री जयशंकर विदेशमन्त्रिणाम् उपवेशनावसरे चीनदेशीयेन स्वीय – समकक्षेण वांगयी इत्यमुना साकं मेलनं कृतवान्। उपवेशने स्वीयभाषण – सम्बोधने डॉ. जयशंकर: भारत- चीनदेशाभ्यां जी विंशति: - इत्येतस्य संरक्षणाय सम्बर्द्धनाय च बहुप्रयासा: कृता:, इति प्रोक्तवान्

हमास प्रकरणम्

हमास द्वारा नवीनतम इजराजयल- बन्धकानां नामानि समुद्घोषितानि। फिलीस्तीन- समूह द्वारा शिरी बिबास इत्येतस्य स्थाने त्रुटिपूर्णशवोन्मुक्त- स्वीकरणमाल्क्ष्य आकोश मध्ये अद्य उन्मुक्त प्रक्रिया स्यात्। इजरायलदेशस्य प्रधनमंत्री बेन्जामिन नेतन्याहु: इत्येतस्य कार्यालयेन पुष्टि: कृता यत् बन्धकानां आसन्नमुक्तविषये सम्बद्ध परिवारा: संसूचिता:।

## कृषि-विज्ञान मेलकं-2025

कृषि विज्ञान – मेलकं विंशतिः पञ्चविंशतिः अद्य प्रभृति नवदेहल्यां समायोजयिष्यते। अद्य केन्द्रीय कृषि कल्याण- मन्त्री शिवराजसिंह चौहानः इत्येतस्य उद्घाटनं विधास्यति। त्रिदिव्सीय- मेलकस्य एतस्य मुख्य विषय- विकसितं भारतम् इति। एतस्मिन् कृषि – सम्बद्धानां नवीन प्रविधीनां प्रदर्शनमपि भविष्यति। भारतीय कृषि अनुसन्धान- संस्थानेन एतत् सदृशाणां नैकासां प्रदर्शनीनां आयोजनं करिष्यते।

## चैम्पियन्स ट्रॉफी

चैम्पियन्स ट्रॉफी इत्येतस्यां क्रिकेट्- प्रतिस्पर्धायां गतदिने समायोजिते द्वन्द्वे दक्षिण अफ्रीका -दलेन अफगानिस्तानदलं सप्ताधिकशतं धावनांकैः पराजितम्। कराची- क्रीडांगणे समायोजिते द्वन्द्वे एतस्मिन् प्रथमं दण्डेन क्रीडयता दक्षिण- अफ्रीका- दलेन पञ्चदशाधिक- त्रिशतं धावनांकाः समार्जिताः प्रत्युत्तरे अफगानिस्तान दलस्य पर्याय- अष्टोत्तर- द्विशतं धावनांकेषु एव समाप्तो जातः।

॥ इति वार्ताः॥